# १७. सूक्तिसुधा ।

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा **विद्वान् सर्वत्र पूज्यते** ।।१।।

न भूतपूर्वं न कदापि वार्ता
हेम्नः कुरङ्गो न कदापि दृष्टः ।
तथापि तृष्णा रघुनन्दनस्य
**विनाशकाले विपरीतबुद्धिः** ।।२।।

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति **योजकस्तत्र दुर्लभः** ।।३।।

अतिदानात् बलिर्बद्धो ह्यतिमानात् सुयोधनः ।
विनष्टो रावणो लौल्यात् **अति सर्वत्र वर्जयेत्** ।।४।।

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** ।।५।।

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं **वाग्भूषणं भूषणम्** ।।६।।

**कृतिः –** भारतसर्वकारस्य बोधवाक्यं '**सत्यमेव जयते**' इति । आयुर्विमा-महामण्डलस्य बोधवाक्यं '**योगक्षेमं वहाम्यहम्**' इति । इतोऽपि अन्येषां बोधचिह्नानां बोधवाक्यानां च सङ्ग्रहं कुरुत ।
मम शालायाः बोधवाक्यं --------------- ---- अस्ति ।

**श्लोकः – १**

१. एकवाक्येन उत्तरत ।

अ) राजा कुत्र पूज्यते ?

आ) कः सर्वत्र पूज्यते ?

२. चतुर्थं पदं लिखत ।

विद्वान् = विद्वत्वम् :: नृपः = .........।

३. समूहेतरपदं चिनुत ।

अ) भूपः, महीपालः, पार्थिवः, पण्डितः ।

आ) प्राज्ञः, विचक्षणः, चाणाक्षः, क्षितिपतिः ।

**श्लोकः – २**

१. एकवाक्येन उत्तरत ।

अ) कीदृशः कुरङ्गः न कदापि दृष्टः ?

आ) सुवर्णस्य कुरङ्गस्य तृष्णा कस्य जायते ?

२. मेलनं कुरुत ।

| | |
|---|---|
| कुरङ्गः | प्रज्ञा |
| रघुनन्दनः | पिपासा |
| तृष्णा | मृगः |
| बुद्धिः | रामः |

**श्लोकः – ३**

१. एकवाक्येन उत्तरत ।

अ) कीदृशम् अक्षरं नास्ति ?

आ) कीदृशं मूलं नास्ति ?

इ) कीदृशः पुरुषः नास्ति ?

ई) कः दुर्लभः ?

**श्लोकः – ४**

१. मेलनं कुरुत ।

| | |
|---|---|
| बलिः बद्धः | अतिमानात् । |
| सुयोधनः बद्धः | लौल्यात् । |
| रावणः विनष्टः | अतिदानात् । |

२. एकवाक्येन उत्तरत ।

अ) बलिः कस्मात् बद्धः ?

आ) सुयोधनः कस्मात् बद्धः ?

इ) रावणः कस्मात् विनष्टः ?

ई) किं सर्वत्र वर्जयेत् ?

**श्लोकः – ५**

१. रिक्तस्थानं पूरयत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| ---- | लङ्का |
| गरीयसी | ---- , --- |

**श्लोकः – ६**

१. एकवाक्येन उत्तरत ।

अ) हाराः कीदृशाः ?

आ) मूर्धजाः कीदृशाः ?

इ) यथार्थं भूषणं किम् ?

ई) का पुरुषं समलङ्करोति ?

I978U3

२. समानार्थकशब्दान् मेलयत ।

| | |
|---|---|
| मूर्धजाः | प्रसूनम् |
| केयूराः | अलंकारः |
| कुसुमम् | केशाः |
| वाणी | बाहुभूषणानि |
| भूषणम् | भाषा |



**हसत ! नन्दत !**

(मोहनः गले पदकद्वयं धरति)

मोना – मोहन, गले धृतं लघुपदकं किमर्थं लब्धं त्वया ?

मोहनः – गीतगायनार्थम् ।

मोना – अभिनन्दनम् । तर्हि बृहत्पदकं किमर्थं लब्धम् ?

मोहनः – गीतसमापनार्थम् । ☺☺

महिला – मीने, तव समीपे दश सेवफलानि सन्ति। तेषु पञ्च फलानि यदि तव सखी नेष्यति तर्हि किं भवेत् ?

मीना – युद्धम् । ☺☺

– चन्दमामा–मासिकात् ।